TECHE
UDINE

MANOSCRITTI

FONDO PRINCIPALE

Manoscritto n. **P_MSS_4329**

Nel Fondo Principale sono confluiti la maggior parte dei lasciti manoscritti pervenuti alla Biblioteca Civica «Vincenzo Joppi» nel corso del tempo: si tratta perciò di un fondo composito nel quale è possibile trovare manoscritti di argomento liturgico, scientifico, giuridico, botanico e altro.

Collocazione:

Biblioteca Civica "Vincenzo Joppi", Udine
https://www.techeudine.it/fondo-principale
https://www.sbhu.it/

...स्योन ॥ श्रीमहावीरं नत्वा गौतमः पृच्छति । भगवन् मार्गशीर्षशुक्लैकादश्यां पाकरणे किं फलं भवति । इति पृष्टे श्री
वीर उवाच । गौतम त्वं शृणु । यथा श्रीनेमिनाथेन द्वाविंशतितमतीर्थकृता कृष्णवासुदेवाय निवेदितं तथाहि । द्वारिका
यां महानगर्यां एकदा श्रीनेमिनाथः समवसृतः । तदा कृष्णो वंदनार्थमुपागतो नेमिं नत्वा यथास्थानमुपविश्य स्वा
मिनं पृच्छति कृष्णः । हे स्वामिन् कस्य वासरस्याराधितस्य बहुफलं भवति । तदा श्रीनेमिना कृष्णस्य मार्गशीर्षशुक्लै
कादशीदिनं प्रोक्तवान् । तस्मिन् दिने कृतं पुण्यं बहुफलदायकं भवति । तत्कथं । तत्र पंचाशदधिकशतकल्याणकानि
तीर्थकराणां भवंति तानि तस्मिन्नेकादश्यां जातानि संति । तानि कथं । यथा पंचाशदतीतचतुर्विंशतितीर्थकरसत्कानि
पंचाशदनागतचतुर्विंशतिजिनसत्कानि । पुनः पंचाशद्वर्त्तमानचतुर्विंशतिजिनपारगतसत्कानि । एवं सार्द्धशतं
जिनानां कल्याणकान्यभूवन् । तेनैषा एकादशी तु उत्तमा । इति श्रीकृष्णहरिराह । सो भगवान् तस्यामेकादश्यां किं कर्त्तव्यमि
ति कथिते । भगवानाह । शृणु राजेंद्र अहोरात्रिप्रमाणं पौषधं ग्राह्यं । चतुर्विधाहारत्यागोपवासः कार्यः । मौनं च कार्यं । एवं न
गुणनध्यानं विना अन्यत् किमपि न कार्यं । एवं पारणकदिने गुरुसमीपे पौषधं पारयित्वा । जिनसद्मनि तीर्थकरान्नमस्कृ
त्य गृहे गत्वा साधर्मिकसंविभागेन पारणकं करोति । एवं द्वादशवर्षाणि यावत् करोति । एवं तपसि पूर्णे उद्यापनं करोति । तदु
द्यापनं करोति इमं । एकादश एकादशकानि प[illegible]कादश नमस्कारावल्या । एकादश मोदकान् परस्परं साधर्मिकाणां दद्या
न् । एवं कृते बहुफलदाता भवति । एवं कथिते पुनः कृष्णोऽप्याह । भगवन् केनापीयमिदमेकादशीतपः कृतं । तदा श्री
नेमिनाथोक्तं । शृणु महाभाग सुव्रतनाम्ना श्रेष्ठिना मार्गशीर्षशुक्लैकादशीतपःकरणतो शिवसुखं प्राप्तवान् । तस्य व्यतिकरं शृ
णु । तथाहि धातकीखंडद्वीपे दक्षिणभरते विजयपुरं नाम नगरं वर्तते । तत्र नरवर्मा नामा राजा राज्यं करोति । स च न्या 1
यी प्रजापालकः । तस्य भार्या शीलालंकारधारिणी चंद्रवती । तस्मिन् पुरे विजयभद्राचार्याः समाजग्मुः । तत् श्रुत्वा सम

मौनि
एकादशी
कथा
१२

स्तापि नगरीजनः। स्वेरेण विहारिणा सार्द्धं वंदनार्थं गतः। तत्र गत्वा विधिना वंदित्वा उपविशति। तदा गुरुणा धर्मदेशा
ना प्रारब्धा। स्त्रराज्यः। किंचिदवसरं प्राप्य गुरुं प्राह हे स्वामिन् त्वया जनानां कर्मक्षयः कथं स्यात् तदादिश्यतां। तदा गु
रुणा सिरेकादशीतपः करणमादिष्टं। ततः श्रुत्वा तेन सकुटंबेन मार्गशीर्षशुक्लैकादशीतपः करणं प्रारब्धं। क्रमेण एका
दशवर्षाणि यावत्तपः कृतं। तदनंतरं उद्यापनं साधर्मिकावात्सल्यं संघस्वजनं कृतं। ततः क्रमेण नीरोगेण मृत्वा। ते
न पुण्येन एकादशारणकल्पे नंदिवत्सः। तत्र एकविंशतिसागरप्रमाणायुः प्रतिपाल्य ततश्च्युत्वा जंबूद्वीपे भरत
क्षेत्रे सोरीपुरनगरे समुद्रदत्तश्रेष्ठी पारवशति। तस्य श्रेष्ठिनः प्रीतिमती भार्या उदरे पुत्रत्वेनोत्पन्नः। सनवमासस
ई सप्त दिने व्यतीते नरात्रौ जनितः। ततस्तस्य बालकस्य नालस्थापनस्थाने निधानं निर्गतं। तेन निधानेन महीयान् ज
न्मोत्सवः कृतः। तस्य च दशमे दिने सर्वकुटंबभोजनं पूर्वमाष्टव्रतपालनदोहलानुमानेन। सुव्रत इति नाम स्था
पितं तदनंतरं सवर्द्धमानः पित्रा सर्वकलाभ्यासिता। च क्रमेण यौवनं प्राप्तः। तदा महर्द्धिकव्यवहारिणां एकादश कन्या
पाणिग्रहणं कृतं। तदनंतरं तस्मिन् पुत्रे गृहभारं समारोप्य श्रेष्ठी निश्चितसन् धर्मपरायणः। प्रांते वा तसने मृत्वा दिवं गतः।
समुद्रदत्तनामा श्रेष्ठी तदनंतरं सुव्रतश्रेष्ठी गृहस्वामी संजातः। एकादशस्वर्णकोटीनामीश्वरो जातः। अतीवलोकमान्यो
राजमान्यो बभूव। अथैकदा वनमध्ये शीलसुंदराचार्य समागत। श्रुतज्ञानधरो मुनीश्वरः तं मुनिसमागतं दृष्ट्वा वनपा
लकेनाचार्यागमनं राज्ञो अग्रे पादितं तदा तद्वंदनार्थं राजा सपरिवारः सुव्रतश्रेष्ठिसहितः गुरुवंदनार्थं गतः। तत्र ग
त्वा गुरुं नत्वा यथास्थानं स्थितः। ततो गुरुणा धर्मदेशना दत्ता। तन्मध्ये मार्गशीर्षशुक्लैकादशीवर्णनं कृतं। तदा सु
व्रतश्रेष्ठिनो तत् श्रुत्वा मूर्छा प्राप्तः। जातिस्मरणमुत्पन्नं। तेन पूर्वभवे एकादशीतपः करणस्य स्मरणं जातं। तत्र
विवतं मिलितस्य मार्गशीर्षशुक्लैकादशीदिनसमाराधनं कृत्वा। एकादशारणकल्पे देवो जातः। ततः श्रुत्वा सुव्रतेना

मा श्रेष्ठी जाता। श्रेष्ठिना पूर्वभवकृततपः फलं प्रत्यक्षं दृष्टं। तदा श्रेष्ठिना गुरुरेवं पृष्टवान्। स्वामिन् मम धर्ममादिस्यतां। त
दा गुरुभिरुक्तं पूर्वभवकृतैकादशी एव कर्त्तव्या। ततः सकुटंबेन श्रेष्ठिना तस्या आराधने सोद्यमो जातः। एवमेकदा चौरैर्लोकमुखा
च्छ्रुतं यत् श्रेष्ठि सकुटंबो मौनधारी पोषधकारी केनाप्यजल्पन् तिष्ठति। तदा चौरैर्धाटीयं कृत्वा श्रेष्ठीगृहे प्रविष्टा रा
त्रौ तत्रांधकारे सद्भिर्बहिर्दीपं मानीय उद्योतः कृतः। श्रेष्ठिना कायोत्सर्गेण स्थितेन दृष्टमेतच्चरित्रं। परं स्वचित्ते कायो विराधना
मेव हृदि ध्यायन् तिष्ठति। एवं तदा चौरैः श्रेष्ठिधनं गृह्णाति। तदा शासनदेवतया सर्वे स्थंभिता लेपमया इव चित्रगता न राश
व जाताः। श्रेष्ठी उद्यतं किमपि न सक्ति। प्रभाते समये जाते धर्मशालायां गत्वा। गुरूणामग्रे पोषधं पारयित्वा। ज्ञानार्म
चयित्वा देवान् वंदित्वा गृहे समागतः। चौरान् तथैव स्थितान् पश्यति। लोकै राज्ञो निवेदितं। राज्ञा तदा चौराणां बंधनाय
नरा प्रेषिताः। श्रेष्ठी चिंतयति चौराणां दुःखं मा स्तु। इति विमृश्य प्रेषितान् नरान् वारयति स्म। तदा तैश्चौरैः सर्वमपि राज्ञोऽग्रे क
थितं ततः श्रुत्वा राजा सपरिवारः समागतः। ततः श्रेष्ठिना प्रवस्त्रादि तिथी किन कृत्वा चौराणामभयदानं मार्गितं। राज्ञापि त
स्य दत्तं। श्रेष्ठिनोक्तं सर्वेपि स्वस्थानं गच्छंतु। तदा शासनदेवतया ते चौरा मुक्ता गृहे गताः। तदा हृष्टेन राज्ञा श्रेष्ठिनः सर्वमपि भ
टवपरिच्छदयति। तदा श्रीजिनधर्मप्रशंसा जाता। पुनः एकदा एकादशीदिने गृहे स्थितेन श्रेष्ठिना पोषधं गृहीत्वा मौनं
कृत्वा कायोत्सर्गेण स्थितः। तदा अग्निर्लग्नः। लोकाः सर्वे पुत्कारं कुर्वंति। तदा श्रावकेषु केनापि केनचिद्वादित्वा सर्वेपि गृहान्नि
र्गताः प्रणस्यंति। सर्वाण्यपि वस्तूनि गृहे मुक्ता। परं तेनाग्निना श्रेष्ठिसंबंधि किमपि वस्तु न ज्वालितं। सर्वमपि नगरं ज्वालितं
जिनगृहं पोषधशालायां विमुक्ता। चान्यपि दग्धं। प्रभाते लोकाः सर्वेपि मिलिताः। परस्परं प्रजल्पंति। लोजना आश्चर्यं पश्यतां य
ताऽस्य श्रेष्ठिनः किमपि न दग्धं। पुण्यप्रभावात् सर्वमपि स्थितं। एतत् श्रुत्वा राजा श्रेष्ठिगृहमागत्य वस्त्रालंकारादिना सत्कृत्य २
जिनधर्मप्रशंसा जाता। यथोक्तं। धर्मः कुलजलजवनं चिंतामणि पिपञ्च नवकारो। अरिमारि चोर राउल घोर उवसग्गपणासे

मौनिए
कादशी
२

इस्त १ एवं परिपालितप्रत्याख्याने उद्यापनं कृत्वा । एकादशसंख्यया सर्ववस्तु ढौकितं । साधर्मिकवात्सल्यं संघपूजनं चैत्य
दिपरिचयनं धर्मलेखनं कृत्वा । श्रीधर्मघोषसूरिपार्श्वे संयमं जग्राह । निरतिचारं संयमं परिपालयति । सुव्रतनामा ऋषिः अन्य
दा एकादश्यां मौनेन स्थितस्य । सुव्रतऋषिकोपि मिथ्यादृग्देवः समागत्य । कौशलनाडिकयोर्वेदनं कृतवान् । बहुप्रकारेण
तेपि वदनानोपसाम्यति । तदनंतरं स देवः साधुद्वेषं रूपमेवं वदति । एवं कियत्सुव्रतऋषिरुपाश्रयाद्बहिर्निर्गत्य । श्रा
वकाणां काव्ये भेषजं कारापयति । तदायं साधुर्नीरोगी स्यात् । लोका नगरे एवं वदंतिस्म । तत्श्रुत्वा सर्वश्रावका मिलि
ता । साधुरग्रे समागत्य मुनि भेषजमादत्त्वा किं तेसा मिन्नभेषजं कुरु । एवं कथिते । सुव्रतऋषिपि भेषजं न करोति । ब्रु
ते तेन भेषजेन ममैव दोषः स्यात् यस्मै तस्माद्बुते सति । एवं साधु नां लावयनूकर्मक्षयं कृत्वा । केवलज्ञानं प्राप्तं । तदति न
देवेन केवलमहो सर्वं कृतः । स केवली बहून् नरनारीन् भव्यान् प्रतिबोध्य । प्रांते सलेषनां कृत्वा च मोक्षसुखमवाप ।
इति सुव्रतकथां श्रुत्वा । इत्थं मौनैकादशीव्रतमाराध्य । तीर्थंकरकर्म निकाचितं कृतवान् । इत्यादि श्रीवीरेण श्री[illegible]
गौतमादिकानां मौनैकादश्या गणधराणामग्रे प्रतिपादितं । ततः श्रुत्वा गणधरादयः सर्वेपि लोकाः श्रावकश्राविका एकाद
शी समाराधयति । केचिदाराध्य मोक्षं जग्मुः । केचिद्दिवं जग्मुः । इति श्री मौनिएकादशीकथा समाप्ता ॥ शुभं भवतु ॥

सव्रतेन एकेस्मातेहलमानः २०० बब१.. [illegible] गाथाः [illegible] सहमदृतवरतो [illegible]
वारं [illegible]

२